# श्रीमद् भागवत रसिक कुटुंब

## श्रीलक्ष्मीनृसिंहकरुणारस

श्रीमत्पयोनिधिनिकेतनचक्रपाणे,
भोगीन्द्रभोगमणिराजितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 1॥

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि-
सङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरोरुहराजहंस,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 2॥

संसारघोरगहने चरतो मुरारे,
मारोग्रभीकरमृगप्रचुरार्दितस्य ।
आर्तस्य मत्सरनिदाघसुदुःखितस्य,

**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 3॥**

**संसारकूपमतिघोरमगाधमूलं,**
**सम्प्राप्य दुःखशतसर्पसमाकुलस्य ।**
**दीनस्य देव कृपया शरणागतस्य,**
**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 4॥**

**संसारसागरविशालकरालकाल-**
**नक्रग्रहग्रसितनिग्रहविग्रहस्य ।**
**व्यग्रस्य रागनिचयोर्मिनिपीडितस्य,**
**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 5॥**

**संसारवृक्षमघबीजमनन्तकर्म-**
**शाखायुतं(ङ्) करणपत्रमनङ्गपुष्पम् ।**
**आरुह्य दुःखजलधौ चकितं(न्) दयालो,**
**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 6॥**

**संसारसर्पविषदिग्धमहोग्रतीव्र-**
**दंष्ट्राग्रकोटिपरिदष्टविनष्टमूर्तेः ।**

**नागारिवाहन सुधाब्धिनिवास शौरे,**

**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 7॥**

**संसारदावदहनाकरभीकरोग्र-**

**ज्वालावलीभिरतिदग्धतनूरुहस्य ।**

**त्वत्पादपद्मसरसीरुहमागतस्य ,**

**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 8॥**

**संसारजालपतितस्य जगन्निवास,**

**सर्वेन्द्रियार्थबडिशाग्रझषोपमस्य ।**

**प्रोत्कम्पितप्रचुरतालुकमस्तकस्य,**

**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 9॥**

**संसारभीकरकरीन्द्रकराभिघात-**

**निष्पीड्यमानवपुषः(स्) सकलार्तिनाश ।**

**प्राणप्रयाणभवभीतिसमाकुलस्य**

**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 10॥**

**संसारसागरनिमज्जनमुह्यमानं(न्),**

दीनं(वँ्) विलोकय विभो करुणानिधे माम् ।
प्रह्लादखेदपरिहारपरावतार,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 11॥

संसारयूथ गजसंहतिसिंहदंष्ट्रा,
भीतस्य दुष्टमतिदैत्य भयङ्करेण ।
प्राणप्रयाण भवभीति निवारणेन,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 12॥

अन्धस्य मे हृतविवेकमहाधनस्य
चोरैर्महाबलिभिरिन्द्रियनामधेयैः ।
मोहान्धकारकुहरे विनिपातितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 13॥

बद्ध्वा गले यमभटा बहु तर्जयन्तः(ख्)
कर्षन्ति यत्र भवपाशशतैर्युतं(म्) माम् ।
एकाकिनं(म्) परवशं(ञ्) चकितं(न्) दयालो
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 14॥

एकेन चक्रमपरेण करेण शङ्ख-

मन्येन सिन्धुतनयामवलम्ब्य तिष्ठन् ।

वामेतरेण वरदाभयपद्मचिह्नं(लँ),

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 15 ॥

प्रह्लादनारदपराशरपुण्डरीक-

व्यासादिभागवतपुङ्गवहृन्निवास ।

भक्तानुरुक्तपरिपालनपारिजात,

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 16 ॥

आद्यन्तशून्यमजमव्ययमप्रमेय-

मादित्यरुद्रनिगमादिनुतप्रभावम् ।

त्वाम्भोधिजास्य मधुलोलुपमत्तभृङ्गीं(लँ),

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥17॥

वाराह-राम-नरसिंह-रमादिकान्ता,

क्रीडाविलोलविधिशूलिसुरप्रवन्द्य।

हंसात्मकं(म्) परमहंस विहारलीलं(लँ),

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥18॥

प्रह्लादमानससरोजनिवासभृङ्ग,
गङ्गातरङ्गधवळाङ्ग रमास्थिताङ्क।
शृङ्गार सुन्दरकिरीटलसद्वराङ्ग,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥19॥

श्री शङ्करार्य रचितं(म्) सततं(म्) मनुष्यः(स्),
स्तोत्रं(म्) पठेदिह तु सर्वगुणप्रपन्नम् ।
सद्योविमुक्तकलुषो मुनिवर्यगण्यो,
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥20॥

लक्ष्मीपते कमलनाभ सुरेश विष्णो,
वैकुण्ठ कृष्ण मधुसूदन पुष्कराक्ष ।
ब्रह्मण्य केशव जनार्दन वासुदेव,
देवेश देहि कृपणस्य करावलम्बम् ॥21॥

यन्माययार्जितवपुः(फ्)प्रचुरप्रवाह-
मग्नार्थमत्र निवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन,
स्तोत्रं(ङ्) कृतं(म्) सुखकरं(म्) भुवि शङ्करेण ॥22॥

श्रीमन् नृसिंह विभवे गरुडध्वजाय,

तापत्रयोपशमनाय भवौषधाय ।

तृष्णादिवृश्चिक-जलाग्नि-भुजङ्ग-रोग,

क्लेशव्ययाम हरये गुरवे नमस्ते ॥ 23॥

स्वामी नृसिंहः(स्) सकलं(न्) नृसिंह,

माता नृसिंहश्च पिता नृसिंहः ।

भ्राता नृसिंहश्च सखा नृसिंह,

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 24॥

इति श्रीमच्छङ्करभगवतः(ख्) कृतौ

लक्ष्मीनृसिंहकरावलम्बस्तोत्रम् सम्पूर्णम् ॥